# संस्कृतवार्ता:

**दिनाङ्क :-22.10.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**भारतस्य रीटेल्**

भारतस्य रीटेल्- इति अल्प विक्रयक्षेत्रे अस्मिन् वर्षे नवरात्रि-दीपावली पर्वयोः मध्ये उत्सव-कालस्य विक्रयणं सर्वाधिकं जातम्, यस्मिन् वस्तूनां व्यापारः अभूतपूर्व-रूपेण चत्वारि दशमलवोत्तर पञ्च लक्ष-कोटि-रूप्यकाणि, तत्रैव पञ्चषष्ठी सहस्र-कोटि-रूप्यकाणि यावत् सेवानां च अभूतपूर्व-स्पर्शः अभवत्। अखिल भरतीय व्यापारी परिसंघेन आयोजिते राष्ट्रव्यापि सर्वेक्षणे ज्ञातं यत् गतवर्षस्य समानकालस्य तुलनयां समग्रव्यापारः पञ्चविंशति प्रतिशतं यावत् वर्धितः। सर्वेक्षणे अग्रे सूचितं यत् प्रायः द्विसप्ततिः प्रतिशतं यावत् व्यापारिणः सुचितवन्तः यत् अधिकविक्रय-परिमाणम् मुख्यतया जी. एस्. टी. इत्यस्य मूल्येषु ह्रासेन अभवत् इति।

**बिहार-विधानसभा-निर्वाचनस्य**

द्वाविंशत्यधिकैकशत विधानसभाक्षेत्राणां कृते द्वितीयान्तिम-चरणस्य नामाङ्कनपत्राणां परीक्षणं ह्यः सम्पन्नम्। प्रक्रियायाः समये, पूर्वीय चम्पारण्-मण्डलस्य सुगौली-विधानसभाक्षेत्रस्य वी आई पी इति विकासशील्-इन्सान्-दलस्य अभ्यर्थिनः नामाङ्कनपत्रं प्रस्तावकानां अपर्याप्तसङ्ख्यायाः कारणात् अस्वीकृतम्। अवधेयं यत् द्वितीय-चरणस्य कृते मतदानम् अग्रिमे मासे एकादश दिनाङ्के भविष्यति। नामाङ्कनपत्राणां प्रत्यावर्तनं श्वः भविष्यति।

**निर्वाचन-आयोगेन**

निर्वाचन-आयोगेन उक्तं यत् नागरिकाः राजनैतिकदलानि च अधुना ई. सी. आई. एन्. ई. टी. मञ्चे सी-विजिल-ऐप् इत्यस्य उपयोगेन आदर्श-आचारसंहितायाः उल्लङ्घनसम्बद्धाक्षेपान् निवेदयितुं शक्नुवन्ति । आयोगेन एकस्मिन् वक्तव्ये उक्तं यत्, दूरवाणी-केन्द्र-सङ्ख्या एकं नव पञ्च शून्यं समेत्य परिवाद-निरीक्षण-व्यवस्था अपि स्थापिता अस्ति।

## रेलमन्त्री

रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् दीपावलि-छठ-पर्वयोः यात्रिणां जन-सम्मर्दस्य आवश्यकतां पूरयितुं आगामिषु दिनेषु प्रायः अष्टशताधिक सप्तसहस्राणि यावत् विशेष-रेलयानानि चालयितुं रेल्-विभागेन योजना कृता अस्ति, अपि च उत्सवस्य जनसम्मर्दस्य निरीक्षणार्थं आपत्कक्षापि स्थापिताः सन्ति। मन्त्री ह्यः नवदिल्ल्याः रेलस्थानकं गत्वा उत्सवावधौ यात्रिकाणां कृते कृतानां व्यवस्थायाः मूल्याङ्कनं कृतवान्।

## देहली - मुख्यमन्त्रिणी

देहली-राज्यस्य मुख्यमन्त्रिणी रेखा गुप्ता ह्यः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलित्वा दीपावल्याः शुभाकामनाः प्रदत्तवती। श्रीमती गुप्ता, दिल्ली-नगरस्य विकासकार्याणां, स्वच्छ-यमुना-अभियानस्य, आगामि छठ्-उत्सवस्य सज्जतायाः च विषये अपि श्रीमोदिनं उक्तवती। यमुना-नद्याः पुनरुज्जीवनार्थं तस्याः सर्वकारस्य निरन्तरप्रयासानां विषये दिल्ली-राज्यस्य मुख्यमन्त्री श्रीमोदिनं सूचितवती। सा अवोचत् यत् दिल्ली-सर्वकारः मलनिर्गम-शोधनक्षमतां वर्धयित्वा, आधुनिक-अपशिष्टजलप्रौद्योगिकीनां माध्यमेन, औद्योगिक-अपशिष्टानां निर्गमनस्य कठोरतया निरीक्षणं कृत्वा, नदीं स्वच्छं प्रदूषणमुक्तं च कर्तुं प्रतिबद्धः अस्ति इति। श्रीमती गुप्ता अवदत् यत्, नदीतीरेषु हरितक्षेत्राणि विकसितानि सन्ति, नद्यां अवैधरूपेण अपशिष्टानां निक्षेपं निवारयितुं च उपायाः कृताः सन्ति। मुख्यमंत्री अवदत् यत् अक्टोबर्-मासस्य पञ्चविंशति दिनाङ्कात् अष्टाविंशति दिनाङ्कपर्यन्तं आचर्यमाणस्य छठ्-उत्सवस्य सर्वविध सज्जताः सन्ति।

## आई सी सी -क्रिकेट्

आई सी सी महिलानां एकदिवसीय क्रिकेट्-विश्वचषक स्पर्धायां कोलम्बो-नगरस्य आर्. प्रेमदासा-क्रीडाङ्गणे दक्षिण-आफ्रिका-दलेन डी. एल्. एस्.-पद्धत्या पाकिस्तानं सार्धैक शत धावनान्कैः पराजितम्।

**।।इति वार्ताः।।**